॥ श्रीगणेशाय नमः ॥ ॥ श्रीगुरुभ्यो नमः ॥ ॥ दक्षिणामूर्तये नमः ॥ ॥ गौतमाय नमः ॥

हनूमद्गुरुचरणयुगलसरसिजे मच्चित्तभृंगो रमतु मूले स्वव्याप्तिपक्षधर्मतयोः संगत्यप्रदर्शनेन
न्यूनतां परिजिहीर्षुस्तयोरेककार्यानुकूलत्वरूपसंगतिं प्रदर्शयन्व्याप्त्यनंतरमित्यादिमूलमव
तारयति ॥ अनुमितीति ॥ अनुमितिलक्षणं अनुमितिस्वरूपं यदेकं कार्यं तदनुकूलत्वसंगत्या त
त्प्रयोजकत्वरूपया संगत्या ॥ प्रयोजकत्वं च कारणतावच्छेदकस्यापीति व्याप्तिपक्षधर्मतयोः परा
मर्शनिष्ठकारणतावच्छेदकत्वेनानुमित्यजनकत्वेपि न क्षतिः ॥ यद्यपि पक्षतायाः न कारणतावच्छे
दकघटकत्वं तामनंतरर्भाव्य पर्वतादिवृत्तित्वज्ञानत्वेनैवानु ॥ मितिजनकत्वात् तथापि पक्षता
या अनुमितौ स्वातंत्र्येण कारणत्वात् तदुपलक्षितधर्मिवृत्तित्वस्य कारणतावच्छेदकत्वात् च त रम ॥
द्घटितविशिष्टस्यैव कार्यानुकूलत्वमक्षतमेवेति ध्येयं ॥ निरूपयितुमिति ॥ निरूपणं प्रतिपत्त ॥ १ ॥

नुकूलोव्यापारः एवंच पक्षधर्मताघटकपक्षतानिरूपणस्यापि पक्षधर्मताप्रतिपत्त्यनुकूलत्वेन
ति २ तन्निरूपणत्वम् पक्षतमेवेति मूले पक्षतानिरूपणेपि पक्षधर्मतांनिरूपयितुमित्यस्य नासंगतिः प
क्षेधर्मत्वं यस्या इत्युक्तत्वात् पक्षधर्मतापदे पक्षीयधर्मविशेषरूपपक्षतापरमिति केचित् त
न्निः त्वं तथात्वे लिखनसंक्षेपनिर्बंधिनो टीकाकारस्य पक्षतां निरूपयितुमित्यस्योपेक्षायांबी
प्रसंगात् जाभावात्॥व्याप्तीति॥ व्याप्तिनिरूपणानंतरमिति मूले पाठस्तु प्रायेण व्याप्त्यनंतरमिति पाठे श्री
च तत्रैकाराभावात् प्रमत्त्वस्येत्यादौ तु पेक्षप्रमत्त्वस्यवित्यादिरीत्या प्रमत्वज्ञोपजीवकत्वादित्यादिग्रं
थधारकस्य तथाविधलिखनस्य॥संगतेः तात्रेति मूलेतत्पदं॥ पक्षधर्मतत्परं संप्रत्यर्थस्य घट
कत्वं अन्वयस्यास्य पक्षत्वमित्यत्रैत्यवधेयं॥ संदिग्धेत्यादिमूलग्रंथस्य संदिग्धसाध्यारूपो
धर्मोयत्रेत्युक्तत्वात् विषयतया साध्यीभूतधर्मसंदेहवत्त्वं ताहृशसंदेहपर्यवसितत्वं पक्षते

शि॰टी॰ग॰ त्यर्थः तत्र साध्ये धर्मत्वनिवेशनमफलं ॥ धर्मपदसार्थक्यमस्मिन्न् संदिग्धं साध्यधर्मत्वं बहु
॥२॥ व्रीहिबलात्साध्यनिरूपितधर्मित्वपर्यवसितं तत्त्वं पक्षत्वमित्युक्तौ साध्ये संदिग्धे स्वधर्मत्वं य
स्य तत्त्वं पक्षत्वमित्युक्तौ च साध्यनिरूपितधर्मित्वस्य पक्षधर्मत्वस्य ॥ चाप्रसिद्धिः स्यादेव स्यमा
णानुपपत्तिप्रयोजकं तत् एवं साध्यकोटिकसंशयस्य निवेशे साध्यं ॥ पक्षवृत्ति न वा साध्यं पक्ष
निष्ठात्यंताभावप्रतियोगि न वेत्यादिसंशयस्य संग्रहः तादृशसंशयोपादाने च पक्षस्साध्यवान्न
वेति संशयादनुमित्यनुपपत्तिरतो धर्मत्वांशं परित्यज्य केवलान्वयित्वं धेमणि हतैव वक्ष्यमाणं
तथाविधस्थल संशयानुगमकप्रकारं दर्शयति यत्रेति यत्र यत्धर्मावच्छिन्ने सप्तम्यर्थो निर्णी अ॰उ॰प॰
यान्वयि विशेष्यत्वं साध्यस्य साध्यतावच्छेदकावच्छिन्नस्य षष्ठ्यर्थः प्रकारित्वं तस्यापि निर्णये राम॰॥
न्वयः तत्र तत्धर्मावच्छिन्ने सप्तम्यर्थोनुमित्यन्वयि विशेष्यत्वं तादृशसंबंधेन साध्यानुमितौ ता ॥२॥

दृशसंसर्गावच्छिन्नसाध्यतावच्छेदकावच्छिन्नविधेयकानुमितिजनकतावच्छेदकीभूतेत्यर्थः पक्ष
विशेष्यकसाध्याभाववैशिष्टबुध्यविषयसाध्यधर्मिकपक्षावृत्तित्वपक्षनिष्ठाभावप्रतियोगित्व
विशिष्टबुध्यविषयपक्षः साध्यवानिति निश्चयस्य प्राचीनमते प्रतिबंधकत्वात्साध्यं पक्षवृत्तिन
वेत्यादिसंशयसंग्रहः एवं च मुख्यपर्वतत्वावच्छिन्नोद्देश्यतानिरूपितमुख्यसंयोगसंसर्गावच्छि
न्नमुख्यवन्हित्वावच्छिन्नविधेयताकानुमितित्वावच्छिन्नं प्रति पर्वतत्वावच्छिन्नविशेष्यतानिरूपित
संयोगसंसर्गावच्छिन्नवन्हित्वावच्छिन्नप्रकारताकनिश्चयत्वावच्छिन्नप्रतिबंधकताकसंशयो हेतु
रिति पर्यवसितं तादृशनिश्चय प्रतिबध्यत्वस्य यथाश्रुते घटादि विषयकसमूहालंबनात्मक
वन्ह्यादिनिश्चयप्रतिबध्यघटादिसंशयसाधारण्यात्तादृशनिश्चयत्वावच्छिन्नप्रतिबंधकता
प्रवेशः अवच्छिन्नत्वं चान्यूनवृत्तित्वं न तु स्वरूपसंबंधविशेषः तेन वन्हिसामान्याभाववैशिष्ट

त्रि०टी०ग० बुद्धौ महानसीयत्वादिविषयतामनंतर्भाव्य वन्हिमान् महानसीयवन्हिमानित्यादि सकलज्ञा
३ नसाधारणवन्हित्वावच्छिन्नवत्तानिश्चयत्वेनैव प्रतिबंधकताकल्पनान्महानसीयवन्हिमान्व
न्हिसामान्याभाववान्वपर्वतइत्याद्याकारकासंशये प्रतिमहानसीयवन्हित्वावच्छिन्नप्रकारक
निश्चयत्वेनाप्रतिबंधकत्वात्तपि न तथाविधसंशयस्य महानसीयवन्हित्वावच्छिन्नविधेय
कानुमितौ पक्षतात्वानुपपत्तिः नवा महानसीयवन्ह्यभाववादिविशिष्टबुद्धिप्रतिबंधकता
वच्छेदककोटौ वन्हित्वावच्छिन्नप्रकारत्वादेर्निविष्टत्वेपि वन्हिमानित्याद्यनुमितौ महानसीय
वन्हिमान्नवापक्षखत्वेन तादृशसंशयस्य पक्षतात्वापत्तिः इत्यंचाहार्यस्याप्रमत्वाज्ञानास्कंदि
तस्य निश्चयस्याप्रतिबंधकतया नाहार्यत्वंप्रमत्वज्ञानानास्कंदितत्वंच निश्चयविशेष अ०उ०प्र०
णं देयमतो न तथाविधनिश्चयत्वान्यूनवृत्तिप्रतिबंधकताप्रसिद्धिः पर्वतो वन्हिमान्नवेत्या ३

देः कस्यापि ज्ञानस्य धर्मान्तरावच्छिन्नविशेष्यकान्यसंसर्गकान्यधर्मावच्छिन्नप्रकारकनिश्चय
साधारणपर्वतविशेष्यकसंयोगादिसंसर्गकवह्नित्वाद्यवच्छिन्नप्रकारकनिश्चयत्वान्नु
नहेत्तिप्रतिबंधकताकत्वं न संभवतीति प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपि
तत्वादेः प्रकारविशेष्यणत्वं तु पनीतभानात्मकबाधनिश्चयस्यापि साध्यवत्तानिश्चयनि सामान्य
वर्त्तनीयतयाक्रमत्वस्तानास्कंदितत्वविशिष्टस्य च तेस्यानुमितिविरोधितयातयाविधबा
धदशायामनुमित्यापत्तिरतः संशयत्वनिवेशनं न च पक्षसाध्यविशेष्यकसंशयसाधार
णस्यानतिप्रसक्तस्य संशयत्वस्य दुर्वचतया पुनरुक्तानानुगमतादवस्थ्यमिति वाच्यं बाध
निश्चयनिवर्त्तनीयत्वस्यैवात्र संशयपदेन विवक्षितत्वात् केवलान्वयिनि साध्ये पक्षनिष्ठा
भावप्रतियोगित्वनिश्चय एवमुक्तो बाधः एकविधबाधोपादाने नैव विविध[illegible]संशयातु

शि०टी०ग० गमसंभवात् तदननुगमो न दोषायानुगमस्यापि कथंचित्संभवाच्च यत्तु पक्षसाध्यवैशिष्ट्याव
४ गाहित्वमेव संशयपदेन विवक्षितमिति नाननुगमः साध्यं पक्षवृत्ति न वेति साध्यविशेष्यक
संशयस्यापि तथात्वादिति तदसत् साध्यपक्षवैशिष्ट्यानवगाहिनः साध्यं पक्षनिष्ठात्यन्ता
भावप्रतियोगि न वेति संशयस्यासंग्रहात् नच केवलान्वयिस्थले साध्यं पक्षवृत्ति न वेत्यादि
संशयादेवानुमित्युपपत्त्या तादृशसंशयासंग्रहो न दोषायेति वाच्यं प्रमेयत्वं घटनिष्ठात्यन्ता
भावप्रतियोगि न वेत्यादिसंशयस्य केवलान्वयिग्रंथे मणिकृतैव संगृहीततया तद्विरो
धात् वस्तुतस्तु तादात्म्यसंबंधेन प्रमेयपक्षकवाच्यसाध्यकस्थले च तादृशसंशयाप्रसि
द्धिं तादात्म्यसंबंधेन पक्षसंबंधत्वानावरूपकोप्यप्रसिद्धेः नच साध्ये पक्षनिष्ठात्यन्ताभा अ०उ०प०
वप्रतियोगित्वसंशयस्य पक्षतात्वेप्युक्तस्थले पक्षतावच्छेदकसामानाधिकरण्यमात्रे ४

णानुमितेरुहेस्यत्ते पक्षतावच्छेदकावच्छेदेन वर्त्तमानभेदप्रतियोगित्वकोटिकसंशयस्य पक्ष
तात्ववक्तव्यं तस्यैव सिद्धिनिवर्त्तकत्वात् तच्च न संभवति प्रमेयत्वावच्छेदेन वर्त्तमानभेदाप्रसि
द्धाकोट्याप्रसिद्धेरिति वाच्यं पक्षतावच्छेदकावच्छिन्नवृत्तिकाभावे साध्यतावच्छेदकाव
च्छिन्नप्रतियोगिताकत्वसाध्यतावच्छेदकासंबंधावच्छिन्नप्रतियोगिताकत्वोभयवत्त्वावच्छि
न्नतदभावकोटिकसंशयस्य पक्षतात्वोपगमात् वस्तुतस्तु तत्र पक्षतावच्छेदकावच्छेदेन
धी वर्त्तमानस्य घटपटोभयत्वावच्छिन्नभेदस्यैवाप्रसिद्ध्या साध्यतावच्छेदकावच्छिन्नेनादृश
भेदप्रतियोगित्वकोटिकसंशयस्य पक्षतात्वसंभवात् एवमप्रसिद्धसाध्यकव्यतिरेक्य
नुमानस्थले साध्यपक्षवैशिष्ट्यावगाहिसंशयानुपपत्तेः तत्र साध्यात्मकाभावप्रतियो
गिपक्षवृत्तित्वादिसंशयस्यैव पक्षतात्वस्योपगंतव्यतया संशयपदेन साध्यपक्षवैशिष्ट्या
२१

शि०टी०ग० वगाहित्वनिवेशस्यासंभवः अथ वह्निव्याप्यसाध्यकस्थले महानसीयवह्नित्वावच्छिन्नसा
५ ध्यकस्थलेऽवह्निमात्रवत्त्वेनादिसंशयस्य पक्षतात्वप्रसंगः साध्यवत्तानिश्चयनिवर्त्यसं
त्वात् न च सिसाधनस्थलेऽनुमितिवारणमेव पक्षताहेतुत्वकल्पन फलं एवं चोक्तसंश
यस्यानु[illegible]तमिति हेतुत्वोपगमेऽपि सिद्धिदशायामनुमित्यापत्त्यसंभवात् तस्य
पक्षतात्वमिष्टमेवेति वाच्यं साध्यतावच्छेदकावच्छिन्नसाध्यवत्त्वाभावान्यतरस्मिन् पक्षसं
बंधावगाहिसाध्यसंदेहस्यैव प्राचीनैः पक्षतात्वोपगमात् अन्यथा बाधसाधारणरूपेण
पक्षतात्वोपगमेऽपि सिद्धिकालेऽनुमितिवारणसंभवात् बाधवारकसंशयत्वनिवेशस्यापि
प निष्प्रयोजनकत्वात् न च तादृशसंशयस्य वह्निव्याप्यधूमाववत्तानिश्चयरूपबाधा अ०उ०प०
प्रतिबध्यतया नातिप्रसंग इति वाच्यं वह्निव्याप्याप्रकाशवान्नवधान्यवंतः पर्वतो वह्निमान्न वे ५

त्वादिसंशयस्य तादृशबाधनिश्चयप्रतिबध्यत्वमानावत्तापि तद्वारणासंभवात् यत्तु प्र
कृतसाध्यतावच्छेदकावच्छिन्नविषयताघटितधर्मावच्छिन्नप्रतिबध्यतानिवेशान्नोक्ता
तिप्रसंगः वन्ह्यभाववद्विशिष्टज्ञानत्वावच्छिन्नाया वन्हिव्याप्यवत्तानिश्चयप्रतिबध्यताया अ व
वच्छेदककोटौ वन्हिव्याप्यत्वावच्छिन्नवि षयिताया अनंतर्भावादिति तदसत् वन्ह्यभावा
दिसाध्यकस्थले वन्हिमान्नवेति संशयासंग्रहप्रसंगात् वन्हिविशिष्टबुद्धित्वावच्छिन्नाया
वन्हिमत्तादिनिश्चयप्रतिबध्यताया अवच्छेदककोटौ वन्ह्यभाववत्ताद्यवच्छिन्नविषयताया
अनंतर्भावादिति यत्र वन्हिव्याप्यत्वावच्छिन्नस्यैव पक्षसत्वं साध्यत्वं च तत्र वन्हिव्याप्यो
वन्हिमान्नवेति संशयवारणस्याशक्यत्वात् यत्तु साध्यव तात्वेन प्रतिबंधकतावच्छेदक
विषयताघटितधर्मावच्छिन्नत्वेन प्रतिबध्यताया विशेषणीयत्वं सर्ववन्हिव्याप्यवत्तात्वेन प्र
र्न

शि०टी०ग० तिवह्न्यभावादिनिश्चयत्वेनाप्रतिबंधकतया नद्विषयतायास्साध्यवत्तात्वानप्रतिबंध
६ कतावच्छेदकत्वविरहेणानातिप्रसंग इति नद्यपि न नावत्तापि महानसीयवह्निसाध्यक
स्थले महानसीयवह्न्यभावाभाववान्पर्वतः सवह्निमान्नवेति संशयवारणासंभवात् अ
त्रोच्यते संशयत्वं स्वनिष्ठविषयिताघटितधर्मावच्छिन्नप्रतिबंधकतानिरूपितप्रतिब
ध्यताशालित्वं तेन भेदेन विषयिताभेदानुपगमात् संशयनिष्ठवह्निमत्पर्वतादि
विषयितायाअपि प्रसिद्धत्वं निश्चय इति त्वात् प्रतिबंधकतावच्छेदकघटकत्वोपपत्ति [illegible] पर्व क
तादिसाध्यकस्थले वह्न्यभाववान्पर्वतो घटवान्नवेत्याकारकसंशयस्य तादृशधर्मा क्रां
तस्य साध्यवत्तानिर्णयप्रतिबध्यस्य चवारणाय साध्यवत्तानिश्चयप्रतिबध्यतावच्छे अ०उ०सं०
दकावच्छिन्नेन निरुक्तसंशयघटकप्रतिबध्यतानिवेशनीया घटाभावादिमत्तातान ६
मे
वह्न्यभाववत्तांशेऽप्रामाण्यग्रहकवलितस्य

त्वावच्छिन्नप्रतिबन्धकतायाञ्जनकत्वान्नातिप्रसंगः तत्र वह्न्यभाववान्पेत्यादि
पक्षतात्वमिष्टमेव तस्य वह्निः पक्षनिष्ठात्यन्ताभावप्रतियोगिन्येवेति संशयस्य समग्रा-
लतत्वात् स्वनिष्ठविषयितायांच बाधप्रतिबन्धकतावच्छेदकत्वं निवेशनीयं तेन वह्निव्या-
प्यसाध्यसाधकस्थले वह्निमान्नवा पक्ष इत्येतादृशसंशयस्य व्युदासः तत्र वह्निव्याप्याभा-
वाभाववत्तेन व्याप्यस्य पक्षग्रहणेपि संशयत्वघटकीभूतस्वनिष्ठवह्निमत्पक्षविषयता-
या वह्निव्याप्याभावनिश्चयप्रतिबन्धकतावच्छेदकत्वविरहात् एवंचसुत्थं वह्नित्वावच्छिन्न
साध्यकस्थले वह्न्यभाववान्पर्वत इत्येतादृशबाधनिश्चयप्रतिबध्यस्य मेहानशीय वह्नि
मान्नवेति संशयस्य पक्षतात्ववारणाय साध्यवत्तानिश्चयप्रतिबन्धकतावच्छेदकावच्छिन्न
त्वनिवेशनमित्यवधेयं एतेनावच्छेदकावच्छेदेनानुमितौ पक्षतावच्छेदकसामानाधिकर

=वह्न्यभाववान्पर्वतो३

शि०टी०७०

७

ण्यमात्रेण कोटिद्वयावगाहिनो निश्चयस्यावच्छेदकावच्छेदेन साध्यादिमत्तानिश्चयप्रतिब
ध्यत्वेऽपि निरुक्तसंशयत्वाभावेन न पक्षतात्वमिति संक्षेपः अथावच्छेदकावच्छेदेन कोटिद्व
यमवगाहमानस्य कोटिद्वयसमुच्चयस्य पक्षतात्वापत्तिः तस्याप्युक्तरूपाक्रांतत्वात् नंच
विरोधावगाहित्वनिवेशात्तद्वारणासंभवः कुत्रचित्किंचित्त्वमिति योगिकविरोधभानस्य समु
च्चयेप्यक्षतत्वात् साध्यतदभावादिविरोधावगाहित्वस्य प्रत्येकं साध्यं पक्षवृत्तिर्न वेति सकर्
क संशयसाधारण्यासंभवादिति चेन्न संयोगादेरव्याप्यवृत्तित्वज्ञानदशायां तद्वत्त्वग्रहवि
षयीभूतधर्मिणि तदभावादिग्रहोत्पत्त्या तद्वत्ताग्रहस्य तदभाववत्ताग्रहप्रतिबंधकताया
मव्याप्यवृत्तित्वज्ञानस्योत्तेजकतामपेक्ष्याव्याप्यवृत्तित्वावगाहित्वेनैव प्रतिबंधकतोपगमे ७
व्याप्यवृत्तित्वंज्ञानवच्छिन्नाधारताकत्वं सर्वत्र प्रतिबंधकतावच्छेदकमव्याप्यवृत्तित्वं किमर्थं य

स
तानेतादृशाधारतायाञ्च तत्संसर्गतयैवभानमभ्युपेयते एवंचसमुच्चयनिष्ठकोटिविषय
तीनविपरीतधीप्रतिबंधकतावच्छेदिकाव्याप्यवृत्तित्वविषयतानिरूपितत्वात् अतस्त्वदुक्तसं उ
व शयेनिरुक्तौस्वपदेनसमुच्चयोपादानासंभवेनपक्षताल्पापत्तिविरहात् अथवास्वघटितधर्मा
वच्छिन्नप्रतिबंधकतानिरूपितप्रतिबंध्यतावच्छेदकीभूतायास्वनिरूपकतावच्छेदकधर्माव
च्छिन्ननिरूपितविरोधविषयितानिरूपितात्मकारितासामानाधिकरण्यसंबंधेनतद्विशिष्टप्र
कारितैवसंशयत्वंतच्चसमुच्चयव्यावृत्तंसमुच्चयेविरोधाभानेनकोटिद्वयविषयतयोर्विरोधवि
षयित्वानिरूपितत्वात्संशयेचांततः कोट्योः संसर्गतयापिपरस्परविरोधभानोपगमेनसक
लसंशयसंग्रहः यद्देशे संशयत्वंतत्कोटिकविरोधस्यैवोक्तरूपेणोपादानसंभवान्नवस्त्वंतरवि
रोधभानमादायापीतिप्रसंगइति केचित्तु साध्यनिष्ठप्रकारताभावनिष्ठप्रतिबध्यतावच्छेदक

×२ चिंताबीजं तु संशये समुच्चयाविषयविरोधावगाहित्वस्यैव तावत्संशयसमुच्चययोर्वैलक्षण्यसंपादकतासं
भवादेकविशेष्यतांगीकारो अयुक्त इति × अथवा पर्वतत्वावच्छेदेन वन्हिव्याप्यसाध्यकस्थले वन्हिव्याप्यभावाभावधर्मिता [illegible]

विशेष्यताशालित्वं समुदितार्थः संशये धर्मिण्युभयप्रकारतानिरूपितैकविलक्षणविषयताऽऽ
समुच्चयवैलक्षण्यापादेयतेति वदंति तन्नित्यं मध्ये पक्षतावच्छेदकावच्छिन्नविशेष्यकसाध्य
तदभावकोटिकज्ञानत्वादिकमुपेक्ष्य निरुक्तरूपेण संशयनिवेशनप्रयोजनं दर्शयति तेनेति
पक्षेति यस्य विशेष्यकस्य पक्षः साध्यवान्न वेत्याकारकस्य साध्यविशेष्यकस्य साध्यं विप
क्षवृत्ति न वेत्याकारकस्य संशयस्याननुगमः तथा सति फलस्याविलक्षणतया व्यभिचारेण
कारणताभंग इति भावः इदमुपलक्षणं साध्यवद्भेदादिकोटिकसंशयाननुगमोपि बोध्यः वि
शिष्य संबंधनिवेशनप्रयोजनं दर्शयति नवेति संबंधांतरेण तत्संबंधातिरिक्तसंबंधेन
संदेहे संदेहदशायां निर्णीतसंबंधेन पक्षांशे साध्यीयसंसर्गविधया तर्कलीननिर्णयवि
षयीभूततत्संबंधेन एतदनंतरमनुमिताविति हरणीयं तत्संबंधेन संशयासत्वेपि तत्संबं

अ०उ०सं०प०
८

धेनसिद्धिरूपत्वकाले ग्राह्यापत्तिसंभवान्निर्णीतेत्युक्तं संबंधमनिवेश्य साध्यनिर्णयसामान्यनिवर्त्तनी
यत्वनिवेशे ऽप्रसिद्धिप्रसंगः यत्किंचिन्निर्णयनिवर्त्यत्वं यत्किंचित्संसर्गकनिर्णयसामान्यनिवर्त्तनीयत्वं
वा यदि निवेश्यते तदा मनसि प्रसंगो बोध्यः धर्मत्वांशपरित्यागे बीजमाह नवा तमः प्रभृतिष्विति स्व
या धर्मत्वसंशयविषयेत्यत्र साध्यकत्वं पक्षत्वमित्युक्तौ धर्मत्वनिवेशे प्यवृत्तिसाध्यकघटादिपक्षकस्थले
न पक्षतावैकल्यं घटादिसमवेतत्वस्याप्रसिद्धत्वात् गगनादौ तत्संशयासंभवात् तेजस्तमः प्रभृतिप
र्यंतस्य पक्षत्वानुसरणं तथा च साध्ये संबंधांतरेण पक्षवृत्तित्वसंदेहदशायां निर्णीतसंबंधेनानुमितिर
वारणाय प्रकृतसाध्यतावच्छेदकसंबंधेन स्ववृत्तित्वसंशयस्यावश्यं निवेश्यतया तमः प्रभृतिसमवेतत्व वेशानी
स्याप्रसिद्ध्या साध्ये पक्षवृत्तित्वसंशयमादाय पि न तत्र पक्षतोपपत्तिरिति भावः स्वरूपसंबंधेन तमो
वृत्तित्वस्य प्रसिद्ध्या तेन संबंधेनानुमितौ नानुपपत्तिरतः समवायेनेति पक्षे साध्यीयसाध्यतावच्छे

दकसंबंधावच्छिन्नधर्मितासंशयस्य पक्षतात्वे तमः अप्रतिपुद्धत्तिमत्साध्यसाधनेनानुपपत्तिरत आका
शादिति तदैकल्यं पक्षतावैकल्यं संदेहोहोनुमितौ हेतुर्विशेषणतया पक्षधर्मतानिष्ठतनुनकतायार क्षण
वच्छेदको वा अथवा उपलक्षणतया तद्धसनुनकतायामवच्छेदकः तत्रा ह्यपक्षद्वयं हूपयति मूलेसं
वस देहइति विशेषणं अपेक्षणीयानुमितिप्रा°ॆ°नाकं अनुमितिकारणविशेषणाविधया अनुमि
तिकारणतावच्छेदकं वेति यावत् परामर्शपूर्वं तस्य संशयस्य नाशादित्यन्वयः यत्रादौ लिंगदर्शनं
ततो व्याप्तिस्मरणं तदभिप्रायेण लिंगदर्शनस्य यत्र तयोर्विपरीतक्रमः तदभिप्रायेण व्याप्तिस्मरण
स्य नाशकत्वमभिहितं अत एव क्रोमयोर्नाशकत्वासंभवेपि न क्षतिः आदिपदेन यत्र संशयानंतर श्रा
क्षणो व्याप्तिस्मरणाद्यनुगुणज्ञानोत्पादः तत्रातरनंतरमेव व्याप्तिस्मरणादिस्तत्र तादृशज्ञानसंग्र
हः एतावता कारणतापक्षोपि निरस्तः कार्याव्यवहितप्राक्क्षणे स्वतो निर्व्यापारस्य कारणत्वास ६

संभवात् व्यापारस्यानतिप्रसक्तस्य दुर्वचत्वात् द्वितीयं दूषयति नोपलक्षणमिति अव्यावर्त्तकताप
त्तेः सिद्धिकालेऽनुमितिवारकतापत्तेः तत्कालीनपरामर्शस्यापि कालांतरीणसंशयविषयधर्मिद्वित्ति
त्वावगाहितया सामग्र्या असत्त्वेनेति भावः अथ साध्यसंदेहो नानुमितिहेतुरेव लिंगदर्शनादेः पूर्वोत्पन्न
स्य संशयस्य तेन विनाशेऽपि तदनंतरं परामर्शाव्यवहितप्राक्क्षणे जायमानसंशयांतरादेवानुमितिरिति क
यत्र ल्प्यते ऽनुत्पन्न एव संशये स्वसामग्रीवशात् परामर्शोत्पत्तिस्तत्रानुमित्यनुदयप्रसंगः परामर्शकाले
कसत्वे तदुत्तरं च विशेषदर्शनरूपप्रतिबंधेन संशयानुत्पादादिति वाच्यं फलानुरोधेन सर्वत्रानुमित्युप 1
धायकपरामर्शाव्यवहितप्राक्क्षणे संशयोत्पादकल्पनात् यत्र संशयोत्पादप्राक्क्षण एव परामर्श
सामग्रीप्रमाणसिद्धा यत्र वा परामर्शसामग्रीपूर्वक्षणे संशयजनकधर्मिज्ञानाद्यभावः प्रामाणिक
स्तत्र परामर्शानंतरं साध्यस्य प्रत्यक्षानिश्चय एवोपगम्यते तत एव प्रत्यक्षाद्युपपत्तेस्तत्रानुमितेर्नो मी

न
त्वनुव्यवसायस्याप्यगत्यानन्यमतमेव कल्प्यते अनुगतानुगतसिषाधयिषाभावकूटविशिष्टसिद्ध्य-
१० भाववस्यानुमितिहेतुत्वापेक्षया संशयहेतुतायां लाघवात् संशयहेतुत्वोपगमे बाधनिश्चयदशायांसं-
शयाभावादेवानुमितिवारणसंभवात् नोक्तविधबाधाभाववस्यानुमितिहेतुता कल्प्यते नानुमितिसाम-
ग्री प्रतिबंधकतायां तद्निवेशेन च लाघवात् जनकज्ञानविराधितयैव बाधादीनां हेत्वाभासतोपप-
त्तेः संशयस्य च कार्यतावच्छेदककोटौ कारणवैशिष्ट्यं निवेश्य विशिष्य तादृशसंशयत्वेन हेतुता-
वाच्या अतो दीधितिकारोक्तप्रकारस्य स्वघटिततयोक्तयुक्त्या आवश्यकत्वात्प्रतिबध्यतादीनां स्व- उ
स्यावच्छेदकभेदेन भिन्नानामननुगमात्संशयानुगममात्रपर्यवसानेपि न पक्षतिः संशयस्य बाधसा-
धारणतदभाववत्ताज्ञानत्वेन कारणत्वं न तु पक्षधर्मिकसाध्यतदभावोभयप्रकारकज्ञानत्वेन गौरव- १०
त्वात् बाधनिश्चयदशायां च नानुमित्यापत्तिसंभवः प्रत्यक्षादिसाधारणलौकिकविशिष्टबुद्धित्वा

वच्छिन्नं प्रति बाधनिश्चयं प्रति बंधकतायाः आवश्यकत्वमिति तु न अत्रापि बाधनिश्चये प्रामाण्य

ग्रहसत्वेनुमित्यापत्तेः अप्रामाण्यग्रहाभावस्य संशयजनकताया प्रयोजनविरहेणानिवेशात् सा

ध्यसंदेहे अप्रामाण्यग्रहसत्वेप्यनुमितस्तु पंगमे क्षतिविरहात् इति चेन्न प्रत्यक्षादिनानिर्णीतस्ये

स्यापि साध्यस्यानुमित्सायामनुमितेरानुभाविकत्वात् संशयपक्षता क्षतात्वेतदनुपपत्तेः अनुमवाय

त्यापे विशेषदर्शनस्य छकप्रत्यक्षादेवसर्वत्र प्रवृत्त्यादिसंभवेनुमानप्रामाण्यस्यैवविलोपापत्तेः

(अनुमित्स) संशयानंतरजातसिध्यात्मकपरामर्शादनुमित्यापत्तेश्चेति संक्षेपः संशयनाशोपियावत्स

न मंतं निर्णयसंभवस्तावत्स्थितं संशययोग्यतायाः अनयायात्त्वस्याएवपक्षतात्वं संभवतीति तदनिरा

स्य करणे मूलं न्यूनतातोनापीति मूले संशययोग्यतानिराकरणपरतयाव्याचष्टे संशययोग्यता

मिति साधकबाधकप्रमाणसिद्धिबाधहेतुरूपप्रयाप्रतायप्रत्वे सवदेवानुमित्यनुपपत्तेः अ

पक्षधर्मताप्रत्यक्षव्याप्तिस्मरणयोरविलक्षणोत्पन्नं तरं परामर्शः यत्र तत्र व्याप्तिस्मरणकालीनपरामर्श

पक्षधर्मताज्ञान

नुमितिरूर्द्ध्वं सिद्धिबाधहेतुमनन्वस्तुरादेः सिद्धिहेतुभूतपरामर्शस्यत्वसत्त्वैवसत्त्वादतस्तत्त्वहंसिद्धि
बाधपरतयाव्याख्येसाधकेतियद्यपिबाधकमानपदस्यबाधजनकतत्सामग्रीपरत्वेपिनक्षतिः
बाधसामग्र्यनंतरक्षणेकदाचिदप्यनुमित्यनुत्पादात् तथापिबाधजनकत्वमात्रेणतत्सामग्रीप
प रत्वेनतदवच्छिन्नाभावस्यहेतुतास्यात्तत्रचोक्तैवानुपपत्तिःबाधसामग्रीत्वेनतत्परत्वंचविनाक्ष
णान्तरितईहतीतिलक्षणस्याआवश्यकत्वेबाधएवलक्षणोन्वितेत्यभिप्रायेणेदं ननुपक्षेसाध्या
भावनिश्चयस्यबाधतयाकेवलान्वयिनिसाध्याभावाप्रसिद्ध्याबाधाप्रसिद्धिरितितदभावघ
टितपक्षतावैकल्यमतआहकेवलान्वयिनिपक्षनिष्ठेति साध्येत्यादिःधीःनिर्णयःसुलभो
बाधइतितथाचतादृशबाधाभावस्यैवपक्षताघटकत्वात्तदनुपपत्तिरितिभावःसुलभइत्यस्य भ
नतत्राभावांशेसाध्यीयत्वज्ञानात्मकबाधस्यापिकदाचित्कस्यविशिष्टरूपस्याप्रसिद्धातदभाव ११

ఇదంతయా ధర్మధర్మ [illegible] త్వా సత్తాత్తివ పిత్తే కవిలక్షణావిధేయతా ప్రయుక్తం

శ్రీగణాధిపతయేనమః పక్షేతా యాం పరత్ర సాం [illegible] నయుక్తం || 7 [illegible] సాధ్య నిష్ఠం యత్ సాక్షా

భావనిత్యం యత్ప్రతిబద్ధతా [illegible] దకవిశేషతాం [illegible] యదితా [illegible] || [illegible]

[illegible] || అత్ర తత్ర [illegible] సాధ్యకస్య [illegible] వ్యాప్యా భావనా [illegible] సంశయ

[illegible] పక్షేతా [illegible] వాదిః [illegible] తత్త్వసంశయ [illegible] విషయత

[illegible] సంశయా [illegible] విశేషయ తాం [illegible] ప్రతిబంధకతా [illegible]

[illegible] నిరూపిత [illegible] విశేష [illegible] నిరూపిత [illegible] విషయతా [illegible]

[illegible] సంశయ [illegible] ప్రతిబంధకతా [illegible] సంశయ [illegible]

[illegible] సాధ్య [illegible] భావ [illegible] వ్యాప్య [illegible] సంశయ [illegible]

[illegible] || = || శ్రీరస్తు ||

घटितत्वमपि पक्षतायाः संभवतीति त्वचितं व्याप्तिस्मरणादिना पूर्वानुमित्यानाशे स्थलेऽनुमितिर्यथा
घ्रसिसाधयिषाविरहेत्यादिमूलमवतारयति नन्वीति अत्रापि परामर्शपूर्वमनुमित्यानाशस्थले
पि पुनरनुमित्या परामर्शनंतरमनुमित्यंतरं ननु परामर्शानंतरोत्पन्नेनेच्छाजनकज्ञानेनेच्छेजनन
समकालं परामर्शनाशान्नाहृशोच्छातः कथमनुमितिरित्यत आह तत्तस्य परामर्शानंतरमिति विनश्य
द्वस्यानुमित्सया ऽनुमितिमुपपाद्याविनश्यद्वस्थायामप्युपपादयति स्मरणेति चाक्षुसादिपरा
मर्शस्यानुमित्संशेऽपूर्वसाधनताप्रकारकसमूहालंबनत्वं नोपपद्यते स्वायोग्यविशेष्यकज्ञानजन
ने इंद्रियस्यासामर्थ्यात् अतस्तस्य तथात्वमुपेक्ष्य तन्मूलकव्याप्यवत्पक्षगोचरसंस्कारात्पूर्वमनुमि
त्याजनकेष्टसाधनतात्तानाहितसंस्कारसहकृतात्समूहालंबनस्मरणात्मकपरामर्शांतरस्यानुस
रणस्मरणेत्युपलक्षणं तथा विधामा॰ न सपरामर्शोपि बोध्यः ननु क॰ ० कामाभावान्नैतादृशकल्प

नासंभवद्व्याप्तिकां परिहरति फलबलादिति सिसाधयिषारूपकारणं विनाऽनुमित्यात्मककार्यानु
त्पत्तिबलादित्यर्थः सिषाधयिषाविरहोपपत्तीति मूलस्यानुमातुरित्यादिः तेनेश्वरस्य सिषाधयिषाया
स्तत्र सत्वेपि न क्षतिः इच्छारूपपक्षताया आत्मनिष्ठप्रत्यासत्त्यैव हेतुत्वाभिप्रायेणेदं न च तत्रापि
पूर्ववत् फलबलादनुमित्यां कल्पयित्वाऽनुमितिः शक्योपपादिका तत्र तदभावस्यानुभवसिद्धत्वात्तत्र
यो कल्पनासंभवात् हर्षकस्यापि यस्य मेघानुमितिर्नासीत् तेन तत्रेष्टसाधनताया अगृहीतत्वे
न तज्ज्ञानेच्छानुभवस्य चासंभवेन तदनुमित्यासामग्र्या एव दुर्घटत्वात् तद्विषये निष्ठप्रत्यासत्त्यैवानु
मित्या या हेतुता वाच्या इत्यभिप्रायेण पक्षतोपपत्तिरीत्येति हृदा शंकते न चानुमितीति इच्छैव समा
नाधिकरणाव्यधिकरणसाव्यधिकरणसाधारणेच्छामात्रमेव स्वनिष्ठैवानुमानसमवेतैव तस्मा
ईश्वरेच्छायाः पक्षतात्वप्रसंगादिति तथा च सिद्ध्यनंतरमनुमित्यापत्तिरित्यर्थः तदानीं सिषाधयिषायां २२

तज्जनकत्वमितितथाचानुमितिजनकत्वविशिष्टेच्छात्वेनैवहेतुताकारणतावच्छेदकविशिष्टस्याकृत
त्वमेवफलोपधानेतंत्रमितिनातिप्रसंगइतिभावः अनुमितिजनकत्वेनजनकत्वेआत्माश्रयसत्वे
पिसुप्तत्वान्नानुमित्यापत्तेःदूषणांतरमाहतथेति योग्यतास्वरूपयोग्यताअनपायादितिकारणतावच्छेद
कधर्मरूपयोग्यतायाः सर्वदैवानपायादित्यस्यार्थः तदुपधानंतद्वैशिष्ट्यंतदभावात् अनुमितिवैशि
ष्ट्याभावात्तथाचानुमितित्वादिनियामिकायाअनुमितिविशिष्टेच्छायाः प्रागसत्वादनुमितेरेवानुप
पत्तिः इतीदमुपलक्षणंअनुमित्यनंतरमनुमित्यापत्तिरपिद्रष्टव्यं नन्वनुमितिजनकतावच्छेदकीभू
तायावंतोधर्माः प्रत्येकंतदवच्छिन्नकूटविशिष्टत्वरूपतत्सामग्रीसमवधानमेवेच्छाविशेषणंदेयंत
च्चतत्कार्याभाववहितप्राक्क्षणएवेतिनातिप्रसंगइत्याशंकांपरिहरतिनतत्सामग्रीतिकारणमात्र
स्येतितथाचपरामर्शादिसत्वदशायामीदृशापेक्षानाविरहादेवानुमितिवारणसंभवात्परामर्शा

दीनां हेतुताविरहप्रसंग इति भावः ननु सामग्रीसमवहितेच्छात्वेन पक्षतायां न हेतुतोपेयते सामग्रीघ
टकहेतूनां मिथो विशेष्यविशेषणभावे विनिगमनाविरहात् तेषां स्वतंत्रकारणत्वे चातिप्रसंगस्य वा
रितत्वात् किंतीश्वरेच्छामादायैव सिद्धिकाले पक्षताव्यवहारवारणाय पक्षपदप्रवृत्तिनिमित्ततमेव
ताद्रूप्येणापेयते अतो नायं दोष इत्यतो दूषणांतरमाह हेतोरेवेति अनुमितिसामग्र्या एव पक्षतात्वसंभवे
नेच्छारूपविशेष्यभागनिवेशस्य निष्प्रयोजनकत्वादित्यर्थः अत्रेष्टापत्तौ दूषणांतरमाह तदानीं
मितितदानीं परामर्शादिसमवहितसिषाधयिषायां अन्वयाख्यानस्य सामग्रीविरहेण नैवक्तुमश
ता। यादृशीसामग्रीमध्यनिवेशापातात् तथा चैतादृशाकारणां सिषाधयिषाविरहविशिष्टसिध्यभावए
वएवं च तस्यैव पक्षतात्वमस्तु अलं तत्कारणांतरस्य किं पक्षताकुक्षिनिक्षेपेनेति सिद्धांतलक्षण
एव पर्यवसानमिति भावः सिद्धांतलक्षणे सिषाधयिषाधीनानुमिते रूपवारणाय १३

सहकृतांतं साधकमानविशेषणमुपात्तं नन्वेतद्वैवोपयुज्यते परिसिसिसिषाधयिषापरामर्शानां त्रया
णां अनुमित्यव्यवहितपूर्वक्षणे अवस्थितिः संभवति नचैवमुपपद्यते आत्मयोग्यविशेषगुणानां द्विक्ष
णमात्रस्थायितया त्रयाणां युगपदवस्थानासंभवात् न च यथा पेक्षाबुद्ध्यात्मकस्य परामर्शस्य सा
ध्यनिश्चयस्य वा पगमनमुत्पादस्ततो वर्ततीयक्षणे त्रयाणामवस्थानं संभवतीति वाच्यं अपेक्षाबु
द्धेः क्षणत्रयावस्थायित्वेऽपि कुर्वाणेत्वहंव्यवहितोत्तरक्षणे तदधिकरणे विशेषगुणोत्पादात्तस्य
पगमात् अन्यथा स्वसमानाधिकरणस्यानंतरक्षणोत्पन्नविशेषगुणात्मकनाशकवशात् तस्या अ
मितृतीयक्षणे विनाशापत्तेरित्याशंकां परिजिहीर्षया पालिस्यात्मकसहकृतालंबनपरामर्शस्य केनापि
शविशेषणप्रयोजनं दर्शयति यत्रेत्यादिना अनुमित्यव्यवहितोत्तरक्षणे विशिष्टपक्षप्रत्यक्षं
न संभवति इच्छोत्पत्तिकाले ज्ञानानुत्पत्त्या विशेषणज्ञानघटितसामग्रीविरहात् इच्छापूर्वक्षणे ता

ताहृशस्मरणात् ८

हशासामग्रीसत्त्ववधाने इच्छासामग्र्यपेक्षया प्रत्यक्षसामग्र्या बलवत्वेन तस्या एवोत्पादासंभव इत्यतो
विशिष्टस्मरणानुसरणं न्यूनताभंगाय परामर्शपूर्वेत्यन्ते इच्छास्थले प्रयोजनमनुक्त्वा तदनंतरक्षणोत्प
न्ने इच्छास्थले तहृशपदिति अनुमितीति यत्रेत्यनुषज्यते इच्छासामग्रीसंपन्नये अनुमितौ इष्टसाधनत्वा
विषयकेतिशेषः साध्यतद्व्याप्यविशिष्टपक्षस्मरणात् पूर्वोक्तयुक्त्या व्याप्त्युपाहितपरामर्शस्यानुमिता
विष्टसाधनत्वावगाहि ताहृशस्मरणात्स्त्वासंभवात् यत्र परामर्शाव्यवहितपूर्वक्षणे इष्टसाध
नताज्ञानं तत्र तत्पूर्वक्षण एव फलेच्छासंभवेन तस्याः परामर्शोत्पत्तिसमये नाशात्तदुत्तरमनुमि
त्सायाअसंभवेन इष्टसाधनताविषयकपरामर्शस्यावश्यकत्वात् स्मरणानुसरणं न्यूनतापरिहा
रायप्रत्यक्षपरामर्शस्थले प्रयोजनमाह अनुमित्सापूर्वेति अत्रापि यत्रेत्यनुषज्यते प्रत्यक्षात्म
कधूमवत्त्वादिविशेषणज्ञानस्थले तज्ज्ञानकसंनिकर्षादिनस्तदुत्तरक्षणे विशिष्टप्रत्यक्षमेव प्र १७

सहकृतांतर

विष्यतीनत्विच्छाविनश्यदवस्थसंनिकर्षादिरोषणाभ्रमस्यानुधावनेनभयासंगौरवमतोविशेषणस्मरणप
र्यन्तानुधावनं अनुमित्सापूर्वकाले परामर्शजनकसन्निकर्षादि सत्वे तस्या एवानुपपत्तिरेतोनुमित्साकाले
सन्नेव पसंनिकर्षादिति सहकृतानां तु भागे पक्ष्या प्रसिध्याधधियका विरह विशिष्टत्वं तस्याभावविशेषणत्वे
शिष्याध ×सहिता× यिञ्चाहशाप्यां तहभावविशिष्टस्य सिध्वनावस्यासंभवात् सिध्यौसत्यामसत्यांवा
नुमित्सनुपपत्तिरतः साधकमानविशेषणमिति सिषाधयिषापदस्य सिध्यीच्छादिपरत्वे भ्रमस्य सत्वश्री
प्रकारके च्छावलादसत्यां भ्रमस्य सत्यामस्यां सिद्धिदशायामनुमित्सापत्तेः अनुमितिगोचरेच्छासामान्य
परत्वेपीयत्किंचिद्ज्ञानेश्वरेतानजायतामितीच्छावलात्सिद्धिकाले नुमित्सापत्तेः नच्चानुमित्सुत्वस्यापि
ताहशेच्छाविषयसिध्येस्तत्रानुमितिरिष्टैवेतिवाच्यं प्रकृतानुमित्सुत्वस्यैव याहशेच्छायाविषयसिद्धि
नस्ताहसेच्छासत्वे एवसिद्धिकाले नुमितेरानुभाविकत्वादुक्तेच्छायास्त्वांततउपस्थितंपक्षपगान्त

रमानससत्त्वेनापिविषयसिद्ध्याकीनित्करत्वादिमतः सिषाधयिषापदार्थव्याप्तेष्टसिषाधयिषायेतिघट
१७ विशिष्टपर्वतानुमितिर्जायतामितीछासत्त्वेनुवह्निविधेयकानुमितिसत्त्वात्ता नत्साध्यविशिष्टेतिसत्संबंधे
नतत्साध्यतावच्छेदकावच्छिन्नविशिष्टत्वस्यपर्वतः तेनकाचित्संबंधेनवह्निविशिष्टपर्वतः विषयकानुमितिर्जाय क
ताद्रव्यत्वावच्छिन्नविशिष्टपर्वतविषयकानुमितिर्जायतामि[illegible]छासत्त्वेपिसिद्धिकालेनसंयोगादिना त्याकारके
वह्नित्वावच्छिन्नानुमितिः वह्निविशिष्टमहानसविषयकानुमि तिर्जायतांवह्निविशिष्टद्रव्यत्वावच्छिन्नविष
यकानुमितिर्जायतामीतिछाबलात्पर्वतोवह्निमानित्यनुमित्यनुदयात्तत्संसतितत्सत्तावच्छेदकावच्छिन्ने
तस्यपर्वतः नयत्रयत्किंचिज्ज्ञानेवरंत्तांजायतामितीछाबलाहिवालोकवान्पर्वतइत्याद्यनुमितिसामग्रीदशायांव
ह्निमत्पर्वतविषयकानुमितिर्जायतामितीछाबलादपिसिद्धिसत्त्वेवह्न्यनुमितिर्नजायतेकालीनसिद्ध त
मतिवध्यालोकानुमित्युत्पत्त्यैवनाहर्षेच्छाविषयवास्तववह्निमत्पर्वतविषयकानुमितीछाविषयसिद्धेरित्यु १५

[illegible]
[illegible] ॥ [illegible]
[illegible]
[illegible] ॥ [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

वे २

विषयितिनाः॥ क्ररूपेणगर्भीछायाउत्तेजकत्वंनसंभवतीतिवाच्यंसाध्यविशिष्टपक्षनिरूपितवैलक्षण्यविषयि
ताप्रकारकत्वेनैवछायाउत्तेजकत्वोपगमात्॥ आलोकवान्पर्वतइत्याद्यनुमितेर्वह्निविशिष्टनिरूपितवैलक्षण्य
विषयिताशालित्वाभावेनतनुत्पत्त्यातादृशविषयिताप्रकारकेच्छाविषयसिद्ध्यसंभवात् साध्यविशिष्टपक्ष
निरूपितत्वंचसाध्यावच्छिन्नपक्षनिष्ठनिरूपकताकत्वं अतोह्रदोवह्निमानित्यादौसाध्यविशिष्टपक्षाप्रसि
द्ध्यावपिनतादृशविषयितायास्तत्प्रकारकेच्छायाश्चाप्रसिद्धिः ह्रदादिनिष्ठतादृशस्यमसत्वविषयितानिरूप
कत्वस्यापिह्रदाद्यंशेप्रकारीभूतवह्न्याद्यवच्छिन्नत्वात् वस्तुतस्तु तत्साध्यविशिष्टतत्पक्षविषयकत्वेनतत्सा ५
ध्यतावच्छेदकावच्छेदकावच्छिन्नतत्संसर्गावच्छिन्नविधेयतानिरूपिततत्पक्षतावच्छेदकावच्छिन्नोद्देश्यताकत्वं
विवक्षितमतोवह्निमान्पर्वतोघटवानित्याद्यनुमितिसामग्रीदशायांपूर्वोक्तयुक्त्यावह्निमत्पर्वतविषयकानु
मितिर्जायतामित्याकारकेच्छाबलात्पर्वतादिपक्षकवह्न्यादिविधेयकानुमित्युत्पादेपिन[illegible]क्षतिः तादृशेच्छ

कं
श्यतात्वेन तादृशोद्देश्यतात्वप्रकारकत्वं विवक्षणीयं तेन केवलपर्वतत्वाद्यवच्छिन्नोद्देश्यतात्वेन तादृशोद्देश्य
१६ ताकत्वप्रकारकानुमित्सा तादृश्यां पर्वते अन्यानुमितिसामग्रीसत्वे वह्नेः सिद्धिसत्वेपि न तत्र वह्न्यनुमित्यापत्तिः स्या
वच्छेदक एवं पक्षतावच्छेदकादिनिष्ठानवच्छिन्नत्वावगाहित्वमपि निवेशनीयं अन्यथा जातिमान्वह्निव्याप्यवानिति प
रामर्श[illegible]काले पर्वतो वह्निमानिति सिद्धिसत्वे २ नवच्छिन्नत्वानवगाहीच्छाकाले पर्वतो वह्निमानित्यनुमित्या
पत्तेः पर्वतो वह्निव्याप्यवानिति परामर्शकालीन जातिमान्वह्निव्याप्यवानिति परामर्शस्यकालीनानन
वच्छिन्नत्वानवगाहीच्छानीयं च न तत्र युक्तित्वेनोत्तेजकत्वं बोध्यं साध्यविशि॥ एप पक्षविशेष्यकत्वनिवेशन
प्रयोजनं दर्शयति यत्किंचिदिति यत्किंचिद्विषयकत्वप्रकारकत्वनिवेशेपि यत्किंचिज्ज्ञानं जायतामितीच्छा
वर्णं भवतीति यत्किंचिज्ज्ञानवत्त्वप्रकारकप्रकारकेच्छापर्यन्तानुधावनं नन्वेच्छापूर्वं यत्किंचिज्ज्ञानवत्तान
स्यावश्यंसिध्यत्वात्तादृशेच्छैव न संभवतीत्यत आह गोचरेच्छायाः स्वरूपसत्याः स्वविषयसिध्यैरवविरोधि १६

तावन्नदुक्तं नहि ज्ञाने जाते ज्ञाने इच्छा प्रभवतीति वाच्यं एतदुत्तरं दत्तेयत्किंचिद्देश्वर ज्ञानं जायतामित्याद्याका
या राकारके इच्छाया विवक्षितत्वात् नन्वनुमितित्वप्रकारकत्वनिवेशेनैव तथा विधेच्छाया वारणसंभवे किं गुरुतरसा
ध्यविशिष्टपक्षविषयकत्वप्रकारकेच्छात्वनिवेशेनेत्यत आह अनुमितित्वप्रकारिकायामपीति प्रत्य
क्षात्मकसिद्धिदशायां पर्वते वह्निज्ञानं जायतामित्याद्याकारकेच्छा न संभवतीति तद्विषयीभूत प्रत्यक्षादि
त रूपसिद्धेरेव सत्वात् अंशे प्रत्यक्षाद्यतिरिक्तमितिशेषः आदि आदिपदग्राह्या शाब्दादिसिद्धिपरिग्रहः इति शुद्धः
पाठः सिद्धेः प्रत्यक्षातिरिक्त ज्ञानं जायतामित्यादीच्छाया उत्पादासंभवात् प्रत्यक्षाद्यनंतरमिति प्रत्यक्षा
दिरूपसिद्ध्यनंतरमित्यर्थः आदिपदग्राह्यशाब्दादिसिद्धिकालीनानां शाब्दभिन्नज्ञानं जायतामित्यादीच्छा
नां संग्रहः अनुमित्युत्पादाच्चेति तथा चानुमितित्वप्रकारकत्वनिवेशेऽप्यनुमशक्यमेव तादृशेच्छानामसं
संग्रहप्रसंगादिति भावः इदमुपलक्षणं अनुमितित्वप्रकारकत्वनिवेशेऽपि यदानुमितिर्जायतामितीच्छाका मिती

द्धेसिद्धिसत्त्वे वह्न्याद्यनुमितिवारणाय प्रकृतसाध्यादिविषयकत्वप्रकारकत्वनिवेशनमावश्यकं नच प्रकृत
१७ साध्यादिविषयिण्यानुमितिस्तद्विषयकत्वनिवेशनेनापि दर्शितछायावारणसंभव इति रामु वाच्यं दर्शित
छाया अपि घटाद्यनुमितित्वेन वह्न्यादिगोचरसमूहालंबनानुमितिविषयकत्वात् न चानुमितित्वप्रकारक त्वा नि
रेव कविशेषानुमितिनिष्ठत्व प्रत्यक्षत्वादिना छाविषयस्तत्त्वानुमित्यापत्तिरिष्टत्वात् अनुमितौ प्रत्यक्षत्वप्र
मदाशायामेव तादृशेच्छा रेव यादृशत्वात्सा अनुमितित्वप्रकारकेच्छासमसीकत्वादिति हृदयेन चानु
मितित्वप्रकारकत्वस्यानिवेशे पर्वते वह्नेः प्रत्यक्षसिद्धौ शाब्दसामग्र्यां सत्यां प्रत्यक्षादितिरिक्तं ता
नं जायतामितीच्छासत्त्वेनुमित्यापत्तिरिति वाच्यं तत्र प्रत्यक्षतासत्वेप्यनुमितित्वप्रकारकेच्छाविरहविशि
ष्टसमानविषयकशाब्दसामग्र्याः प्रतिबंधकत्वादेवानुमितिवारणसंभवात् अप्यसिद्धिदशायां प १७
र्वते वह्नेरन्यत्ज्ञानं जायतामितीच्छासत्वेनुमित्यापत्तिः तादृश्या अपि प्यनुमितिविषयकत्वान्न चेष्टाप

त्तिः ननूक्तं पर्वतो वह्निमानित्यादिमानसोत्पत्त्यापत्तिरिच्छाविषयसिद्धेस्तादृशेच्छायायत्किंविद्धोत्तरं त्वानं
नायतामितीच्छानुत्पत्तात् न च प्रत्यक्षेच्छाविशिष्टप्रत्यक्षसामग्रीरूपप्रतिबंधकत्वान्नानुपपत्तिरितिः स
वाच्यं प्रत्यक्षत्वादिप्रकारकेच्छाविशिष्टाया एव मानसादिसामग्र्या अनुमितिप्रतिबंधकत्वात् अन्यथा
सिद्धिदशायां काळेपि तादृशेच्छासत्वेऽनुमित्यनुत्पादप्रसंगात् नव्योक्तयुक्त्या वह्निविधेयकत्वावगाहित्व
निवेशस्यावश्यकतया वह्निप्रकारकत्वावगाहितादृशेच्छावत्त्वान्नानुमितिप्रसंगः अनुमितिनिष्ठतद्वि
धेयकत्वावगाहिच्छादृशायां च जायत एवानुमितिः विधेयतायाः प्रत्यक्षे अप्रामाणिकतया तत्प्रका
रकेच्छाया अनुमित्युत्पत्त्यैव विषयसिद्धिरिति वाच्यं विधेयतायाः प्रत्यक्षाद्वृत्तित्वेन तत्प्रकारिकायाः प्र
त्यक्षान्यत्वाप्रकारिकाया अपि इच्छायाः प्रत्यक्षसिद्धिकाले संभवात् प्रत्यक्षान्यत्वप्रकारकेच्छापर्यंता
नुधावनस्य रीधितिकृतो निर्बीजत्वात् न च विधेयता प्रत्यक्षेऽव्यतेनैव तदवगाहित्वस्य च नामैवोपदर्शिते

पाना

छाकारे प्रत्यक्षान्यत्वोल्लेख इति वाच्यं एवमपि वक्ष्यमाणस्य शाब्दादिसिषाधयिषाकाले अशाब्दं तानं जायतामि-

१९ ब तीछावछेनानुमितिर्जायते न तु प्रत्यक्षसामग्रीकाले इत्यस्य संगमयितुमशक्यत्वात्तादृशेछायाः प्रत्यक्षत्वा-

वृत्तविधेयताद्यवगाहित्वे प्रत्यक्षसामग्रीकाले तत्त्वानुछाताद्दनुमित्योर्व्वित्वात् तदनवगाहित्वे सिद्धमब-

प्यनुत्तेजकत्वात् अत्रोच्यते अनुमितित्वप्रत्यक्षान्यत्वान्यतरप्रकारके छानामनुमितिविषयके छात्वे-

रव्यक्ते नैवानुगमः पर्वतो वह्निमान् जायतामितीछाकाले सत्त्वासिद्धौ तथाविधोपनीतज्ञानसामग्र्यां चानुमि-

धे तेर्वारणाय तथाविधेछाव्यक्तीनां तत्तद्व्यक्तित्वेन प्रतिबंधकता कल्प्यत इति न दोषः न च तासां तत्त-

द्व्यक्तित्वेनानंतप्रतिबंधकत्वकल्पनामपेक्ष्यानुमितित्वादिरूपप्रकारविशेषमंतर्भाव्यानुमित्साना-

मुत्तेजकत्वमुचितमिति वाच्यं तथासति पर्वतो वह्निमान् जायतामितीछाकाले तथाविधोपनीत- १९

ज्ञानविरोधिप्रत्यक्षाद्यनुमित्साविशिष्टतत्सामग्रीसत्त्वे सिद्धौ सत्यां वह्न्यनुमित्युपपत्तये तादृशेछा-

व्यक्तीनां तत्तद्व्यक्तित्वेन सिद्ध्युत्तेजकत्वापत्त्या तदभावसहस्रस्य मिथो विरोधेन विशेष्याभावे विनि-

रव्यत्तु

ननु साध्यविधेयकत्वावच्छिन्नपक्षोद्देश्यकत्वप्रकारकेच्छोपादाने पक्षोद्देश्यकत्वावच्छिन्नसाध्यविधेयक
त्वप्रकारकेच्छाया असंग्रहः तथा साध्यपक्षादिविशेषविषयकत्वेनेच्छानिवेशेऽन्यानुमितिसामग्य्रा यस
मवहितानामनुमितिर्जायतामित्याद्याकारकेच्छानामसंग्रह इत्यत आह यादृशयादृशेति अ[illegible]त्वांसिद्धौ स
यत्किंचिज्ज्ञानेतरत्वानं जायतामितीच्छासत्वे अनुमित्युत्पादात्तासां चानुत्तेजकत्वात्सिद्धौ सत्वामिति [redacted] तादृच्छाप्य
स कं[illegible]मुदायस्येति साध्यैविशेषविशिष्टपक्षविशेषाद्यवगाहित्वप्रकारकेच्छानां तथावि[illegible]धे च्छात्वेनानु
गमय्यैकान्नावानिवेश्यते तथाविधानां अनुमितिर्जायतां प्रत्यक्षान्यत्तानं जायतामित्याद्याकारकेच्छा
य नां तु सिद्धिसत्वे च्छक्तिसत्वेऽनुमितिस्तत्र व्यक्तित्वावच्छिन्नाभावां [redacted] रावनिवेशनीयाः अन्यथाऽति नसिद्धिभेदा
प्रसंगात् न सिद्धिभेदाद्य एव वारणे तेन तत्कालीनसंयोगविभागादिव्यक्तिविशेषाणां नावनिवेशमादायविनि
गमनाविरहोपि निरस्तः सामानाधिकरण्यसंबंधेन तद्धत्वं तान्नावचैशिष्ट्यनिवेशापेक्षया तत्तत्सिद्धि

त
तत्कालीनसिद्धिभेदाद एव वा

भेदानां विशेषणताविशेष्यतैवनिवेशो प्रतियोगितावच्छेदकसंबंधानिवेशेन लाघवात् सिद्ध्युत्तरं तथावि
१९ धेच्छोत्पत्तिकालेऽनुमित्यापत्तिस्तिच्छासामग्र्या एवानुमितिविरोधित्वान्नसंभवतीति बोध्यं इदं त्ववधेयं
तादृशेच्छाभावसमुदायस्य न तत्समुदायत्वेन निवेशः समुदायत्वस्य दुर्वचत्वात् न च तावदभावमात्रवि
षयकधीविषयत्वं तत् तावत्त्वस्य दुर्वचत्वात् तावदभावविषयकबुद्धेस्तत्तदभावविषयकत्वेन निवे
शे तदपेक्षया लाघवेन तत्तदभावविशिष्टत्वेन सिद्ध्यैवनिवेशास्तु अनुचितत्वात् तत्तदभावानां मिथो विशे रे
षणविशेष्यभावानापन्नानां निवेशेऽवच्छेदकतानेदानं प्रतिबंधकताभेदः इति चेदेकविशिष्टापर
त्वेनैवाभा वानां निवेशानौपत्त्यात् तत्र च विशेष्यविशेषणभावे विनिगमनाविरहेऽपि न क्षतिः गत्य
ता त्ताहृत्था न्तराभावात् तावन्मात्रविषयकधीविषयत्वरूपस्य तावत्त्वसमुदायत्वस्य तादृश्येण निवेशो महागौरवा १९
त् तादृश्या यत्किंचिद्विषयत्वघटितत्वेन निवेशे तथाविधधीसहस्रस्य विनिगमनाविरहेण निवेशप्र

संगात् तत्तदभावविशिष्टत्वेनसिद्धेरेवनिवेशयितुमुचितत्वात् इति तत्तदभावानांमिथो विशेषणविशे
ष्यभावानांपन्नानांनिवेशस्यप्रत्येकमतिप्रसक्ततया ऽवच्छेदकत्वायोगेनासंभवात् इच्छायाअननुगमे
पिएवंकरूपेणसर्वासामिच्छानामुपादानासंभवेपि नक्षतिः तथासिषाधयिषाविरहविशिष्टसिद्ध्यभाव
स्यानुमितिहेतुतानुपपत्तिः तावदभावविशिष्टसिद्ध्यभावस्याननुगतत्वादिति भावः अत्रेदमालोचनीयं
वह्निविशिष्टपर्वतमहानसोभयानुमितिर्जायतामित्याद्याकारकेच्छायाअपितत्साध्यविशिष्टतत्पक्षाव
गाहित्वप्रकारकतयापर्वतेवह्नेः सिद्धिकालेमहानसपक्षकानुमित्यादिसामग्र्यामसत्यांतद्देशेच्छव
शात्पर्वतेवह्न्यनुमित्यापत्तिः अनुमित्यंशेतत्साध्यविशिष्टतत्पक्षविषयकत्वान्यतमत्किंचिद्विशेष्यकत्व
प्रकारकत्वविशेषणस्येच्छायांनिवेशेवह्निविशिष्टपर्वतमहानसंवानुमिनुयामिति [illegible] त्यादिसमूहालं
बनेच्छायाअसंग्रहप्रसंगः वन्हिविशिष्टपर्वतावगाहिनीमहानसविषयाकानु [illegible] तिन्नानुमितिर

नुमित्य

१ महानसविषयकानुमितिः पाठांतरे

५ नचतत्कत्वं परिष्कृत्यैव यादृशसाध्याभिधानं इदानीमनुमितित्वप्रत्यक्षान्यज्ञानत्वादिप्रकारकेच्छानां पृथक् पृथग्
भावनिवेशनमेवाभिप्रेतमिति वाच्यं पक्षांतरसूचककाकाराद्यभावात् ५५

र्जायतामित्याद्याकारकेच्छाबलात् उपदर्शितस्थलेऽतिप्रसंगस्याशक्यवारणतात्वेति इच्छाविषयतावच्छेदक
२० तायाः पर्याप्तिनिवेशनमावश्यकमिति तथाच वह्निवि शिष्टपर्वतानुमितिर्भवत्वित्यादिकेच्छायास्तत्साध्य
विशिष्टतत्पक्षविषयकानुमितित्वपर्याप्तविषयतावच्छेदकताकेच्छात्वेनैवोत्तेजकत्वं पर्यवसितं अनुमितित्वानंतर्भा व
वेतादृशेच्छायास्तत्साध्यविशिष्टतत्पक्षविषयकत्वपर्याप्तविषयतावच्छेदकताकत्वेनाशक्यसंग्रहत्वात् एवं प्रत्यक्षान्यतमप्र ता
था कारकेच्छायाअसंग्रहेऽनुमितित्वप्रत्यक्षान्यतमत्वादिप्रकारकेच्छानामनुगमएवसंभवतितथाहि तत्साध्यविशिष्टतत्पक्षविषय
कानुमितित्वपर्याप्तावच्छेदकताकत्वं तादृशधर्मघटकपर्याप्तावच्छेदकताकत्वं तत्साध्यविशिष्टतत्पक्षविषयकत्वनुमिति अ
दि त्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वाऽनिरूपकत्वमेव पर्यवसितं एवं च तत्साध्यविशिष्टतत्पक्षवि
षयकत्वप्रत्यक्षान्यतमत्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपकविषयताकेच्छात्वादिना २०
प्रत्यक्षान्यतमत्वप्रकारकेच्छानां अनुगतजनकतापेक्षया निरुक्तधर्मघटकानुमितित्वनि ३१

अक्तिनां तत्तद्व्यक्तित्वेन सिद्धावुत्तेजकतापत्त्यातदभावसहस्रस्मिन्नो विशेषणविशेष्यभावं
नाविरहेणासिद्धिप्रतिबंधकत्वानंत्यप्रसंगात् तृष्णावच्छेदकतायामेव प्रत्यक्षान्यज्ञानत्वादिनिष्ठावच्छेदक
ताभिन्नत्वनिवेशानमुचितंच्छाभवात् भिन्नावच्छेदकता इत्यंचतादृशेरूपेणैव प्रत्यक्षान्यत्वावत्प्रका
रकेच्छानामपिसंग्रहः संभवतिनचवह्निविशिष्टपर्वतविषयकंजायतामित्येतादृशेच्छायाःसिद्ध्यधीनसं
स्कारोत्पत्तेर्वचरितार्थ्यावारणाय विषयतायामनुमितित्वावच्छिन्नत्वनिवेशस्यावश्यकतयाननत्संग्रहः ५
इतिवाच्यं समवायेन किंचिदवच्छिन्नत्वं निवेश्यैतादृशेच्छा इति चेत् यावारणासंभवात् इति चेत् एवं सति पर
क्षांशेसाध्यावगाहित्वेनानुमितिविषयकेच्छानां उक्तरूपसमग्रीघटरूपान्तरेणोत्तेजकत्वापत्त्या तादृशावच्छे
दकतायामेव पक्षांशेतादृशसाध्यावगाहित्वीयावच्छेदकताभिन्नत्वं निवेश्यतां नाववैवतत्संग्रहस्यापि सं
भवादिति रेच्छायाऽननुगमानिधानासंगतेः नन्वविषमितायां साध्यविशिष्टपक्षावगाहित्वाद्यवच्छिन्नत्व

१ न्यायानुमितिसामग्रीकालीनतादृशेच्छानां प्रतिबंधकत्वे तत्कालीनतत्तदात्ममनःसंयोगादिव्यक्तीनां विनिगमनाविरहेण प्रतिबंधकतापत्तेः ६
२ गतत्वाद्यसामग्र्यभावकालीनतथाविधेच्छानां उत्तेजकतायामपि विनिगमनाविरहेण तत्तदिच्छाकालीनसंयोगविशेषाणामुत्तेजकतापत्तेः ६
३ गत्वापत्तेः अथ वोत्कानुमितिरूपेणोत्तेजकत्वेऽपि तादृशेच्छाया अनुमितिर्जायतामित्याकारकान्यायानुमितिसामग्रीसमवहितेच्छाद्

निवेशनमावश्यकं अन्यथा न्यायानुमितिसामग्रीसमवहितायां नानुमितिर्जायतामित्याद्याकारकविषयविशे
११ षानुपरक्तानुमितीच्छानां वारणासंभवादिति अन्यानुमितिसामग्र्यसमवहिततादृशेच्छानां तत्तद्व्यक्तित्वेनोत्ते
जकत्वस्याभ्युपगंतव्यतया तेजकानामननुगमात् निधानसंगतिरिति वाच्यं तादृशेच्छानां तत्तद्व्यक्तित्वेन प्रति
वा बंधकतयैव तिप्रसंगवारणसंभवेन तासां वारणानौचित्यात् तथासति साध्यविशिष्टपक्षावगाहित्वावच्छिन्न
त्वमधिकमनुमितिनिष्ठविषयतायां निवेश्य दर्शितसामग्र्यसमवहिततथाविधेच्छानां तत्तद्व्यक्तित्वेनोत्ते
जकत्वाकल्पने इति प्रत्याहुः गौरवप्रसंगात् उक्तसकलेच्छानां निरुक्तरूपेणानुगमसंभवेऽपि एतत्क्षणोत्त इति अन्ये आहुः
रक्षणेऽनुमितिर्जायतामित्याकारकेच्छानामेव निरुक्तरूपेण संग्रहात् तत्तद्व्यक्तित्वेन पृथगभावो निवेश
नीयः तादृशक्षणघटितत्वाद्यवच्छेदकत्वाने दमुक्तावच्छेदकतायां निवेश्यतत्संग्रहेऽपि कालांतरेऽपि तथाविधे १६
च्छाबलादनुमित्यापत्तेः कालांतरीणानुमित्युत्पत्त्या च तादृशेच्छाविषयासिद्ध्यैरिष्टापत्त्ययोगादिति अननुग

४ व्यक्तीनां भेदाग्रवानिवेशनाप्याः ननु तासामनुमितिप्रतिबंधकत्वामिति न तदिच्छाभेदनिवेशनस्थले तत्कालीनवायुसंयोग ६
५ भेदनिवेशेनोपपत्तिः इच्छायां तद्व्यक्तिव्याव त्तत्वात् तत्संयोगभावानां वैशिष्ट्यस्य चानिवेशे तादृशवैशिष्ट्यस्य सामानाधि ६
६ करण्यरूपतया साक्षात्संबंधेनेच्छाभेदनिवेशे लाघवसंभवे विनिगमकाभावात् इति प्रकृष्टं प्रसंगादिकुत्तर पाठांतरे ६

१ नच कालांतरीण तादृशेच्छानां तत्तद्व्यक्तित्वेन प्रतिबंधकतया तादृशेच्छाबलादनुमित्यापत्तिवारणसंभव इति वाच्यं ठपदार्थ १

१ तै कथमेतत्प्रकारकरक्षैकानुमितासाव्यक्तीनां तत्तद्व्यक्तित्वेनोत्तेजकत्वापेक्षया तत्समानप्रकारककालांतरीण बहुतरेच्छा

माभिधानसंगतिः रितिनच्चैवं माध्यमिकस्य साध्यवि शिष्टपक्षविषयित्वप्रकारकत्वविशेषणानिवेशस्या
संगतिर्दुर्वारैवेति वाच्यं अनुमितिनिष्ठविषयतायां साध्यविशिष्टपक्षविषयकत्वाद्यन्यसिधानप्रकारक
त्वानवच्छिन्नत्वएवतात्पर्यात् वस्तुतः साध्यविशिष्टपक्षविषयकत्वनिवेशनामवश्यकं अन्यथा यत्किंर
चिज्ञानंनायतायत्किंचिज्ञानेतरत्वानंतानायतामितीछावारणासंभवात् तत्संग्रहे तादृशीनां सर्वासामिछानां
तत्तद्व्यक्तित्वेन प्रतिबंधकत्वे गौरवात् अनुमितिजन्यतामित्याद्यीछानांपृथगनुमितित्वाद्यपर्यासावर
च्छेदकताकेछात्वेनोत्तेजकता अन्यानुमितिसामग्रीसमवहिततादृशेच्छानां च तत्तद्व्यक्तित्वेनैव प्रतिबंध
कत्वमेवेति कृतं पल्लवितेन न चानु धूमेन वह्निमनुमिनुयामित्याकारकेछाबलाद्धूमलिंगकानुमितुत्स
त्वात् तत्साधारणरूपेणैव विशिष्य धर्मिघानामुत्तेजकतायाआवश्यकत्वाक्सील्पत्वेसिध्धिकाले ऽसत्त्वपि
धूमपरामर्शे आलोकादिपरामर्शादनुमित्यापत्तिः पक्षतायाअसत्वादित्यत आह धूमेनेति मि

[illegible]

न्यलिंगकेच्छासत्वेसिसिषदशामात्रएवयदिनानुमितिस्तास्तादृशेच्छायाःप्रतिबंधकत्वंनसंभवतीत्यतोः
२२ सत्वामपिसिद्ध्याविवितितत्रानुमितेस्तदृग्धेतयाप्रदीतितदेतितल्लिंगकानुमितावितिशेषः अन्यमात्रेति
तदन्यमात्रलिंगकत्वप्रकारकत्वसिषिछेत्यर्थः धूमलिंगकानुमितिरालोकलिंगकानुमितिश्चजायतामि
त्याद्याकारकसमूहालंबनेच्छाकालेआलोकादिलिंगकपरामर्शादनुमित्युपपत्तयेमात्रेतितदन्यमात्र
लिंगकत्वप्रकारकत्वंचतल्लिंगकत्वाप्रकारकत्वेसतिकिंचिल्लिंगकत्वप्रकारकत्वंअतः प्रमेयसामान्य
लिंगकस्थलेतदृशाप्रसिद्धावपिनक्षतिः तल्लिंगकत्वाप्रकारकत्वंचतल्लिंगकत्वप्रकारतानिरूपितत
त्साध्यविशिष्टतत्पक्षविषयकत्वावछिन्नानुमितिनिष्ठविशेष्यताकान्यत्वंअतआलोकेनघनेधूमेन
वह्निमनुमिनुयामित्यादीच्छादशायामालोकादिलिंगकत्वस्याद्यनुमितेर्नापत्तिः आलोकलिंगकत्व २२
प्रकारताशरीरेचवास्तवलोकादिप्रकारतानिवेशनीयाकिंत्वालोकत्वाद्यवछिन्नाप्रकारतैवान्यथाः

పక్షేతా ఘటాంతర్యో వింశత్తత్ర। ఘటవ్య కాలికావ్యాప్యవృత్తితావచ్ఛి
తాదృశబుద్ధేనప్రకారత్వకాలీనానామిత్యత్ర వ్యప్రత్యక్షత్వేఽత ఘటోఽపేంద్రవ్యమిత్యాదిబుద్ధి
నప్రకారకాలీనానాం అత ఘటోత్రవ్యమి[illegible]త్యాదిబుద్ధీనాం వ్యవహితపూర్వ
వృత్తినామిత్యర్థః। ప్రతిబంధకతానుపపత్తిరిత్యర్థ[illegible]ప్రత్యక్షేష జ్ఞా
త్యాది। తథా చ ద్వితీయక్షణే తాదృశబుద్ధేర్విశిష్టత్వేన ప్రత్యక్షక్షణే ఽభ తద్వి
శిష్టబుద్ధేరసంభవాత్ ప్రతిబంధకత్వానుపపత్తిరితి భావః। ఘటవ్య కాలికావ్యా
ప్యవృత్తిత్వ[illegible]పక్షేనుపపత్త్యం। ద్వితీయక్షణే తు తాదృశబుద్ధే
నప్రకారకాలీనానామిత్యత్ర ఘటోఽనేకాన్యద్రవ్యమిత్యాదిబుద్ధేనప్రకార
కాలీనానామిత్యర్థః। తథా చ ప్రథమక్షణే ఘటో ఽనేకద్రవ్యమిత్యాద్యాబుద్ధేనా

లంత్ర

ద్వితీయపక్షేऽపి చ ద్రవ్యత్వానవచ్ఛిన్నామిత్యాదిస్థలే తత్ర ద్వితీయపక్షేపి ప్రథమపక్షే
ఽపి ప్రతిబంధకత్వం న స్యాత్ ద్వితీయపక్షే తాదృశజ్ఞానవిరహవిశిష్టే
త్వేన తద్ధర్మస్వరూపసంబంధాత్ ఖిద్యమానకార్యస్య ప్రవృత్తిత్వాపత్తేశ్చ ప్రథ
మపక్షే తద్గ్రహణతాపత్తేః ప్రతిబంధకతావచ్ఛేదకత్రితయాపత్తేః । తాదృశజ్ఞా
నకాలీనామితి ఘటాత్వం తత్ర ప్రతిప్రతిబంధకతాపత్తిరిత్యత్ర
అనాహార్యత్వేనాహార్యత్వప్రకారకసంబంధఘటితాన్యత్వం పూర్వ

लोकत्वादिना धूमादिकं धूमत्वादिना वालोकादिकमवगाहमानयोरिच्छयोरालोकलिंगकानुमितिप्रतिबं
धकत्वतदभावयोरापत्तेः इत्थेनानुमिनुयामितिच्छाया आलो कानुमित्यविरोधित्वोपपत्तये आलो-
कत्वाद्यवच्छिन्नत्वस्येच्छाआलोकाद्यवृत्तित्वे र्नस्ताश्रमा कादिलिं नधर्मावच्छिन्नत्वमेव निवेश्यं द्रव्यत्वादे
रालोकत्वादिविरुद्धत्वमन्यमदृशायां तादृशेच्छायां विरोधित्वोपपादनायालोकत्वादेरालोकादिवृत्तित्वस्ता
नवच्छिन्नकालीनाया आलोकेनानुमिनुयामित्यादीच्छाऽविरोधित्वोपपत्तये च वास्तवालोकादिवृत्तित्व या
स्यैतेन रूपेण ताद्रूप्यमानत्वस्य चोपेक्षणं धूमत्वादेरालोकाद्यवृत्तित्वग्रहदशायां धूमेनानुमिनुयामिती
च्छाया आलोकादिलिंगकानुमित्यविरोधित्वमिष्टमेव विरोधित्वं च तादृशेच्छाया धूमत्वादेरालोकत्वादिवि या
रुद्धत्वग्रहादशायामेव वस्तुतस्तु इत्थं नालोक इत्यादिज्ञानावच्छिन्नकालीनानामालोकोऽस्मितिज्ञानका
लीनानां वाच्छानां तत्तदुल्लिखितत्वेन समूहकूट एव स्वातंत्र्येण प्रतिबंधकतावच्छेदकेऽनुप्रवेशनीयः तेनोक्तक-

नुसरणे तु तादृशज्ञानशून्यकालीनानुमित्यस्य आलोको न द्रव्यमित्यादिज्ञानशून्यकालीनानापि सर्थः तथा प्रथमपक्षलोपगआलोको न द्रव्य

१ स्वपदेन कलीभूतानुमित्युपादानेयादृशानुमितित्वग्रायां कुचिदपि धर्मेणालोकाद्यवृत्तित्वज्ञानं भासिध्यति तत्रस्व समानाधिकरणस्वस
मानकालीनालोकत्वादिविस्थल ज्ञानाविजय धर्म्मवल्लिंगकत्वप्रकारकानुमितिसामान्यानुमितिसामान्यरूपकारणप्रसिद्धिः स्वतानत्रुग
मेन कार्यकारणभावस्य तत्र तदनुमितिव्याप्तिविश्रामेप्य प्रतियोग्यनुमित्सोपादानेन्व आलोको न द्रव्येणानुमिनुयामित्या

स्वसामानाधिकरण्य

ल्पेकालांतरीणपुरुषांतरीणज्ञानवारणाय तत्कालीनत्वतत्पुरुषीयत्वयोर्ज्ञानविशेषणतौ व्यर्थ्यं ह्यस्य कु
चिदपि धर्मेणालोकाद्यवृत्तित्वज्ञानं तत्कालतत्पुरुषघटितप्रतिबंधकतावच्छेदकाद्यमित्यावपि न क्षतिः
आलोको द्रव्यमित्यादितत्पुरुषीयज्ञानविशिष्टत्वेनालोको न द्रव्यमित्यादिज्ञानविरहविशिष्टत्वेनैव वा द्रव्य
त्वादिमल्लिंगक   त्वप्रकारकेच्छा अनुगमय्य तदृशास्तादृशप्रतिबंधकतावच्छेदककोटौ निवेशनीयाः वै
शिष्ट्यं चैकक्षणावच्छिन्नैकात्मवृत्तित्वं तेनेदस्य कालीकाव्याप्यवृत्तित्वापगमात् तादृशज्ञानस्य स्वकालीना
नाद्द्रव्येणानुमिनुयामित्याद्यीच्छानां विशिष्टभिन्नतया प्रतिबंधकत्वोपपत्तिः सामानाधिकरण्यसंबंधेन
वैशिष्ट्यनिवेशान्न पुरुषांतरीयज्ञानमादाय दोषः द्रव्यत्वावच्छिन्नेनानुमिनुयामित्याद्याकारिकानां द्रव्य
त्वांशे लिंगतावच्छेदकत्वावगाहीच्छानां तु न द्रव्यत्वादिमद्विषयकपरामर्शजन्यत्वरूपद्रव्यत्वादिमल्लिंगक
त्वप्रकारकत्वं विषयतायामेव तत्र द्रव्यत्वाद्यव   च्छिन्नत्वभानात् लिंगांशे द्रव्यत्वानवगाहनात् अतस्तत्पावि

कारकयादृशेच्छासमानाधिकरणसमानकालीनज्ञानाप्रसिद्धिस्तथाविधेच्छायाः तथाविधेच्छाभिन्नत्वेनालोकलिंगका
नुमितिप्रतिबंधकत्वापत्तिरिति परास्तं इति ~~पाठः~~ आधिकः पाठः यदेसारभ्य न क्षतिरित्यन्तः पाठः

[illegible]

धेछानामालोकत्वाद्यवछिन्नलिंगकानुमितिविरोधित्वमस्तनमेवआलोकत्वाद्यवछिन्नेनानुमीनुयामित्याद्याछा
नांवताद्दशानुमितित्वविरोधित्वोपपन्नमेवालोकत्ववह्निलिंगत्वाद्यप्रकारकत्ववदालोक त्वाद्यवछिन्नलिंगकत्वा
प्रकारकत्वमपिआलोकत्वाद्यवछिन्नानुमितिप्रतिबंधकतायांनिवेशनीयंपर्वतेवन्हिमनुमिनुयामित्याद्याका
रकलिंगविषेशेनत्वत्वानवगाहीछानांअविरोधित्वोपपत्तेयेकिंचिल्लिंगकत्वप्रकारकत्वनिवेशनेनदर्पस्व
किंचिल्लिंगकत्वप्रकारतानिरूपिततत्साध्यविशिष्टतत्पक्षविषयकत्वावछिन्नविशेष्यताकत्वंअतोधूमेनधन
मनुमिनुयामित्याद्याकारकेछानांनालोकादिलिंगकवन्ह्याद्यनुमितिविरोधित्वं इदमत्रावधेयं आलोकलिं
गकधूमलिंगकानुमितिर्जायतामित्याद्याकारकेछाकालेकेवलालोकादिलिंगकपरामर्शादनुमितिर्नजाय
तेतथाविधानुमितेस्ताद्दशेछाया अविषयत्वातउभयादिलिंगकानुमितेरेवतद्विषयत्वात एवंधूमलिं
गकवन्ह्यनुमितिरालोकादिलिंगकवन्हिघटोभयानुमितिश्चजायतामितीछाकालेघटाद्यनुमितिसामग्र्या

वैलक्षण्यानुपपत्तेः६

